॥ वैराग्य शतकम् ॥

.. vairaagya shatakam ..

तृष्णादूषणम् ।

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्नः
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलम्
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ २ ॥

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥ ३ ॥
खलालापाः सोढाः कथमपि तदाराधनपरैः
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि

त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ ४ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां

कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।

यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां

कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ५ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः

सोढादुःसहशीतवाततपनक्लेशा न तप्तं तपः ।

ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं

तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तै फलैर्वञ्चिताः ॥ ६ ॥

भोगा न भुक्ता वयमेव भुक्ताः

तपो न तप्तं वयमेव तप्ताः ।

कालो न यातो वयमेव याता-

स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ७ ॥

वलीभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।

गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः

समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।

शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने

अहो मूढः कायस्तदपि मरणापायचकितः ॥ ९ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला

रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।

मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी

तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ १० ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं

विपाकः पुण्यानां जनयति भयं मे विमृशतः ।

महद्भिः पुण्यौघैश्चिरपरिगृहिताश्च विषया

महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ११ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया

वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।

व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः

स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ १२ ॥

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं

यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।

संप्राप्तान्न पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययान्

वाञ्छामात्रपरिग्रहानपि परं त्यक्तुं न शक्ता वयम् ॥ १३ ॥

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायतां

आनन्दाश्रुकणान्पिबन्ति शकुना निःशङ्कमङ्केशया ।

अस्माकं तु मनोरथोपरचितप्रासादवापीतट-

क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १४ ॥

भिक्षाशनं तदपि नीरसमेकवारं

शय्या च भूः परिजनो निजदेहमात्रम् ।

वस्त्रं विशीर्ण शतखण्डमयी च कन्था

हा हा तथापि विषया न परित्यजन्ति ॥ १५ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ

मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।

स्रवन्मूत्रक्लीन्नं करिवरशिरस्पर्धि जघनं

मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ १६ ॥

एको रागिषु राजते प्रियतमादेहार्धहारी हरो

नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ।

दुर्वारस्मरबाणपन्नगविषव्याविद्धमुग्धो जनः

शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥ १७ ॥

अजानन्दाहात्म्यं पततु शलभस्तीव्रदहने

स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।

विजानन्तोऽप्येते वयमिह विपज्जालजटिलान्

न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १८ ॥

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं

क्षुधार्तः शाल्यानं कवलयति मांसादिकलितम् ।

प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ॥ १९ ॥
तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभंगुरं तदखिलं धन्यस्तु संन्यस्यति ॥ २० ॥
दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृष्ट्या न चेद्गेहिनी ।
याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ २१ ॥
अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुतोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीवितानकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनम् ॥ २२ ॥
पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालिं कपालिं
ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ २३ ॥
गङ्गातरङ्गकणशीकरशीतलानि

विद्याधराध्युषितचारुशिलातलानि ।

स्थानानि किं हिमवतः प्रलयं गतानि

यत्सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः

प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।

वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां

दुःखाप्तस्वल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥ २५ ॥

पुण्यैर्मूलफलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना

भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यावो वनम् ।

क्षुद्राणामविवेकमूढ मनसां यत्रेश्वराणां सदा

वित्तव्याधिविकारविव्हलगिरां नामापि न श्रूयते ॥ २६ ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां

पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।

मृदुस्पर्शा शय्या सुललितलतापल्लवमयी

सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥ २७ ॥

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजो

ये चाल्पत्वं दधति विषयाक्षेपपर्याप्तबुद्धेः ।

तेषामन्तःस्फुरितहसितं वासराणि स्मरेयं

ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २८ ॥

ये सन्तोषनिरन्तरप्रमुदितस्तेषां न भिन्ना मुदो
ये त्वन्ये धनलुब्धसंकुलधियस्तेषां न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना कीदृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ २९ ॥
भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वतो
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ ३० ॥
भोगे रोगभयं कुले च्युतिभयं वित्त नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ ३१ ॥
आक्रान्तं मरणेन जन्म जरसा चात्युज्वलं यौवनं
सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैः
अस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ ३२ ॥
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्

तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम्॥ ३३॥

भोगास्तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनः

स्तोकान्येव दिनानि यौवनसुखस्फूर्तिः प्रियासु स्थिता।

तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका

लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम्॥ ३४॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला

आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम्।

लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं

योगे धैर्यसमाधिसिद्धसुलभे बुद्धिं विधध्वं बुधाः॥ ३५॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीः

अर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः।

कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं

ब्रह्मण्यासक्तचित्ता भवत भवभयाम्बोधिपारं तरीतुम्॥ ३६॥

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे

कान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः।

वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः

संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित्॥ ३७॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ति

रोगाश्च शत्रव इव प्रहरन्ति देहम्।

आयुः परिस्रवति भिन्नघटादिवाम्भो

लोकस्तथाप्यहितमाचरतीति चित्रम्॥ ३८॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः

तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः।

आशापाशशतोपशान्तिविशदं चेतः समाधीयतां

कामोत्पत्तिवशात्स्वधामनि यदि श्रद्धेयमस्मद्वचः॥ ३९॥

ब्रह्मेन्द्रादिमरुद्गणांस्तृणकणान्यत्र स्थितो मन्यते

यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः।

भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते

भो साधो क्षणभंगुरे तदितरे भोगे रतिं मा कृथाः॥ ४०॥

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रं च तत्

पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः।

उद्भृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः

सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः॥ ४१॥

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको

यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते।

इत्थं नेयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ

कलाः कल्यो भुवनफलके क्रीडति प्राणिशारैः॥ ४२॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं

व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४३ ॥
रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभूत विषयैरित्थंविधेनामुना
संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥ ४४ ॥
न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारी पीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ४५ ॥
नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नार्कं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ४६ ॥
विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता ।
आलोलायतलोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥ ४७ ॥

वयं येभ्यो जाताश्चिरपरिचिता एव खलु ते

समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः।

इदानीमेते स्मः प्रतिदिवसमासन्नपतना

गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः॥ ४८॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं

तस्यार्ध्यस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।

शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते

जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम्॥ ४९॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः

क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः।

जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुः

नरः संसारान्ते विशति यमधानीयवनिकाम्॥ ५०॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः

ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः।

इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं

यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः॥ ५१॥

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं

शूरस्त्वं वादिदर्पव्युपशमनविधावक्षयं पाटवं नः।

सेवन्ते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामा

मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्ननास्था ॥ ५२ ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः

सम इव परितोषो निर्विशेषो विशेषः ।

स तु भवतु दरिद्रो यस्य तृष्णा विशाला

मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ५३ ॥

फलमलमशनाय स्वादु पानाय तोयं

क्षितिरपि शयनार्थं वाससे वल्कलं च ।

नवधनमधुपानभ्रान्तसर्वेन्द्रियाणां

अविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥

अशीमहि वयं भिक्षामाशावासो वसीमहि ।

शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥

न नटा न विटा न गायका

न च सभ्येतरवादचुञ्चवः ।

नृपमीक्षितुमत्र के वयं

स्तनभारानमिता न योषितः ॥ ५६ ॥

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा

विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।

इह भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते

कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ ५७ ॥

अभुक्तायां यस्यां क्षणमपि न जातं नृपशतः
भुवस्तस्या लाभे क इव बहुमानः क्षितिभृताम्।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम्॥ ५८॥
मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः
स्वांशीकृत्य तमेव संगरशतै राज्ञां गणा भुञ्जते।
ते दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रा भृशं
धिग्धिक्तान्पुरुषाधमान्धनकणान्वाञ्छन्ति तेभ्योऽपि ये॥ ५९॥
स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलंकारविधये।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः॥ ६०॥
परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलितम्।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगणो
विविक्तः संकल्पः किमभिलषितं पुष्यति न ते॥ ६१॥
परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा।
अतीतमननुस्मरन्नपि च भाव्यसंकल्पयन्

नतर्कितसमागमाननुभवामि भोगानहम्॥ ६२॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय

श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात्।

स्वात्मीभावमुपैहि संत्यज निजां कल्लोललोलां गतिं

मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना॥ ६३॥

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ

चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु।

को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च

ज्वालाग्रेषु च पन्नगेषु च सुहृद्वर्गेषु च प्रत्ययः॥ ६४॥

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया

भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम्।

कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसीः

अथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे॥ ६५॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः

पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम्।

यद्यस्त्वेवं कुरु भवरसास्वादने लम्पटत्वं

नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ॥ ६६॥

प्राप्ताः श्रियः सकलकामदुधास्ततः किं

न्यस्तं पदं शिरसि विद्विषतां ततः किं।

संपादिताः प्रणयिनो विभवैस्ततः किं

कल्पस्थितास्तनुभृतां तनवस्ततः किम् ॥ ६७ ॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं

स्नेहो न बन्धुषु न मन्मथजा विकाराः ।

संसर्गदोषरहिता विजना वनान्ता

वैराग्यमस्ति किमितः परमर्थनीयम् ॥ ६८ ॥

तस्मादनन्तमजरं परमं विकासि

तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।

यस्यानुषङ्गिण इमे भुवनाधिपत्य-

भोगादयः कृपणलोकमता भवन्ति ॥ ६९ ॥

पातलमाविशसि यासि नभो विलङ्घ्य

दिङ्मण्डलं भ्रमसि मानस चापलेन ।

भ्रान्त्यापि जातु विमलं कथमात्मनीनं

न ब्रह्म संस्मरसि निर्वृतिमेशि येन ॥ ७० ॥

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः

स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभूमैः ।

मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं

स्वात्मानन्दपदप्रवेशकलनं शेषैर्वणिग्वृत्तिभिः ॥ ७१ ॥

यतो मेरुः श्रीमान्निपतति युगान्ताग्निवलितः

समुद्रा शुष्यन्ति प्रचुरमकरग्राहनिलयाः।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले॥ ७२॥
गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-
र्दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते।
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते॥ ७३॥
वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां
स्थानं जरा परिभवस्य तदा पुमांसम्।
आरोपितास्थिशतकं परिहृत्य यान्ति
चण्डालकूपमिव दूरतरं तरुण्यः॥ ७४॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥ ७५॥
तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयम्।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने॥ ७६॥

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो
वयं च स्थूलेच्छाः सुमहति फले बद्धमनसः।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः॥ ७७॥
माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित्॥ ७८॥
रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तःस्थली
रम्यं साधुसमागमावतसुखं काव्येषु रम्याः कथाः।
अबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगते चित्ते न किञ्चित्पुनः॥ ७९॥
रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये।
किंतु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः॥ ८०॥
आसंसारात्त्रिभुवनमिदं चिन्वतां तात तादृ-
ङ्नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा।
योऽयं धत्ते विषयकरिणीगाढगूढाभिमान-

क्षीबस्यान्तःकरणकरिणः संयमानायलीलाम्॥ ८१॥

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं

सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम्।

मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्

न जाने कस्यैष परिणतिरुदारस्य तपसः॥ ८२॥

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं

हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना।

किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी

हा ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः॥ ८३॥

महेश्वरे वा जगतामधीश्वरे

जनार्दने वा जगदन्तरात्मनि।

न वस्तुभेदप्रतिपत्तिरस्ति मे

तथापि भक्तिस्तरुणेन्दुशेखरे॥ ८४॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने

सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः।

भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः

कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम्॥ ८५॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः

स्मरन्तः संसारे विगुणपरिणामां विधिगतिम्।

वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणाः

त्रियामा नेष्यामो हरचरणचिन्तैकशरणाः ॥ ८६ ॥

कदा वाराणस्याममरतटिनीरोधसि वसन्

वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।

अये गौरीनाथ त्रिपुरहरशम्भो त्रिनयन

प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८७ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलरर्चयित्वा विभो त्वां

ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।

आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे

दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ ८८ ॥

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।

कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ८९ ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां

यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ॥

अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशां

अध्वा कोऽपि शिवप्रसादसुलभः संपत्स्यते योगिनाम् ॥ ९० ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी

नैश्चिन्त्यं निरपेक्षभैक्षमशनं निद्रा श्मशाने वने ।

स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा

स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम्॥ ९१॥

ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः।

शफरीस्फुरितेनाब्धिः क्षुब्धो न खलु जायते॥ ९२॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भूः

भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि।

सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतै-

र्भिक्षावस्तुभिरेव संप्रति वयं वृत्तिं समीहामहे॥ ९३॥

महाशय्या पृथ्वी विपुलमुपधानं भुजलता

वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः।

शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः

सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव॥ ९४॥

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा

हानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः।

रथ्याकीर्णविशीर्णजीर्णवसनः संप्राप्तकन्थासनो

निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः॥ ९५॥

चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः

किं वा तत्त्वविवेकपेशलमतियगीश्वरः कोऽपि किम्।

इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनैः

न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः॥ ९६॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं

व्यालानां पशवस्तृणाङ्कुरभुजस्तुष्टाः स्थलीशायिनः ।

संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां

तामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ ९७ ॥

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य

ब्रह्मध्यानभ्यसनविधिना योगनिद्रां गतस्य ।

किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः

कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥ ९८ ॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं

विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी ।

येषां निःसङ्गताङ्गीकरण परिणतस्वान्तसंतोषिणस्ते

धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ ९९ ॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल

भ्रातर्व्योम निबद्ध एव भवतामन्त्यः प्रणामाञ्जलिः ।

युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-

ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ १०० ॥